ततो धन्वन्तरिर्लोकैः काशीराजोऽभिधीयते ।
हिताय देहिनां स्वीयसंहिता विहितामुना ।
अयं विद्यार्थिनो लोकान् संहितां तामपाठ-
यत् ॥"

अथ सुश्रुतप्रादुर्भावः ।

"अथ ज्ञानदृशा विश्वामित्रप्रभृतयोऽवदन् ।
अयं धन्वन्तरिः काश्यां काशीराजोऽयमुच्यते ॥
विश्वामित्रो मुनिस्तेषु पुत्त्रं सुश्रुतमुक्तवान् ।
वत्स ! वाराणसीं गच्छ त्वं विश्वेश्वरवल्लभाम् ॥
तत्र नाम्ना दिवोदासः काशीराजोऽस्ति
बाहुजः ।
स हि धन्वन्तरिः साक्षादायुर्व्वेदविदां वरः ॥
आयुर्व्वेदं ततोऽधीत्य लोकोपकृतिहेतवे ।
सर्व्वप्राणिदया तीर्थमुपकारो महामखः ॥
पितुर्व्वचनमाकर्ण्य सुश्रुतः काशिकां गतः ।
तेन सार्द्धं समध्येतुं मुनिपुत्त्रशतं ययौ ॥
अथ धन्वन्तरिं सर्व्वेवानप्रस्थाश्रमे स्थितम् ।
भगवन्तं सुरश्रेष्ठं मुनिभिर्ब्बहुभिः स्तुतम् ॥
काशीराजं दिवोदासं तेऽपश्यन् विनयान्विताः ।
स्वागतञ्च इति प्राह दिवोदासो यशोधनः ॥
कुशलं परिपप्रच्छ तथागमनकारणम् ।
ततस्ते सुश्रुतद्वारा कथयामासुरुत्तरम् ॥
भगवन् मानवान् दृष्ट्वा व्याधिभिः परिपीड़ितान् ।
क्रन्दतो म्रियमाणांश्च जातास्माकं हृदि व्यथा ।
आमयानां शमोपायं विज्ञातुं वयमागताः ।
आयुर्व्वेदं भवानस्मानध्यापयतु यत्नतः ॥
अङ्गीकृत्य वचस्तेषां नृपतिस्तानुपादिशत् ।
व्याख्यातं तेन ते यत्नाच्छुश्रुवुर्मुनयो मुदा ॥
काशीराजं जयाशीर्भिरभिनन्द्य मुदान्विताः ।
सुश्रुताद्याः सुविद्यार्था जग्मुर्गेहं स्वकं स्वकम् ॥
प्रथमं सुश्रुतस्तेषु स्वं तन्त्रं कृतवान् स्फुटम् ।
सुश्रुतस्य सखायोऽपि पृथक् तन्त्राणि तेनिरे ।
सुश्रुतेन कृतं तन्त्रं सुश्रुतं बहुभिर्यतः ।
तस्मात्तं सुश्रुतं नाम्ना विख्यातं क्षितिमण्डले ॥"
इति भावप्रकाशः ॥

अथ मतान्तरे वैद्योत्पत्तिकथनम् ।

"सत्यत्रेताद्वापरेषु युगेषु ब्राह्मणाः किल ।
ब्रह्मक्षत्त्रियविट्शूद्रकन्यका उपयेमिरे ॥
तत्र वैश्यसुतायां ये जज्ञिरे तनया अमी ।
सर्व्वे ते मुनयः ख्याता वेदवेदाङ्गपारगाः ॥
तेषां मुख्योऽम्बताचार्य्यस्तस्यावम्बा कुले हि तत् ।
अम्बष्ठ इत्यथाद्युक्तस्ततो जातिप्रवर्त्तनात् ॥
परे सर्व्वेऽपि चाम्बष्ठा वैश्या ब्राह्मणसम्भवाः ।
जननीतो जनुर्लब्धा यज्जाता वेदसंस्कृतेः ॥
अम्बष्ठास्तेन ते सर्व्वे द्विजा वैद्याः प्रकीर्त्तिताः ।
अथ रुक्प्रतिकारित्वाद्भिषजस्ते प्रकीर्त्तिताः ॥
सत्ये वैद्याः पितुस्तुल्यास्त्रेतायाञ्च तथा स्मृताः ।
द्वापरे चत्त्रवत्प्रोक्ताः कलौ वैश्योपमाः स्मृताः ॥
अथाम्बष्ठेषु सर्व्वेषु विख्याता अभवन्नमी ।
सेनो दासश्च गुप्तश्च दत्तो देवः करो धरः ॥
राजः सोमश्च नन्दिश्च कुण्डश्चन्द्रश्च रक्षितः ।
एषां वंशाः समुत्पन्ना एतत्पद्धतयो मताः ॥
अन्यपद्धतयोऽप्येवं सन्ति वैद्या न ते श्रुताः ।
बहवश्चैकनामानो नानागोत्रसमुद्भवाः ॥
यथाष्टौ विश्रुताः सेना इत्येवमपरे मताः ।
यस्य यस्य मुनेर्यो यः सन्तानः स स विश्रुतः ॥
तत्तद्गोत्रादिना वैद्यः श्रेष्ठाद्यन्तु स्वकर्म्मणा ॥"
तथा हि ।

"तिस्रो वर्णानुपूर्व्वेण द्वे तथैका यथाक्रमम् ।
ब्राह्मणक्षत्त्रियविशां भार्य्याः स्वाः शूद्रजन्मनः ॥
यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः ।
नैतन्मम मतं यस्मात्तत्रात्मा जायते स्वयम् ॥
पाणिं भर्त्तुः सवर्णासु गृह्णीयात् क्षत्त्रिया शरम् ।
वैश्या प्रतोदमादद्याद्वेदने त्वग्रजन्मनः ॥
सवर्णेभ्यः सवर्णासु जायन्ते च सजातयः ।
अनिन्द्येषु विवाहेषु पुत्त्राः सन्तानवर्द्धनाः ॥
विप्रान्मूर्द्धाभिषिक्तो हि क्षत्त्रियायां विशः
स्त्रियाम् ।
जातोऽम्बष्ठस्तु शूद्रायां निषादः पार्शवोऽपि वा ॥
वैश्याशूद्र्योश्च राजन्यान्माहिष्योग्रौ सुतौ
स्मृतौ ।
वैश्यात्तु करणः शूद्रां विन्नास्वेष विधिः स्मृतः ॥"
एते षट् श्लोका याज्ञवल्कीयाः ॥

"शूद्रैव भार्य्या शूद्रस्य सा च स्वा च विशःस्मृते ।
ते च स्वा चैव राज्ञस्तु ताश्च स्वा चाग्रजन्मनः ॥
पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते ।
असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्म्मणि ॥
शरः क्षत्त्रियया ग्राह्यः प्रतोदो वैश्यकन्यया ।
वसनस्य दशा ग्राह्याः शूद्रयोत्कृष्टवेदने ॥"
इति पद्मत्रयम् ॥

"ब्राह्मणाद्वैश्यकन्यायामम्बष्ठो नाम जायते ॥"
इति च यद्यार्द्धं मानवीयम् ॥

"वैश्यायां ब्राह्मणाज्जातोऽम्बष्ठो हि मुनि-
सत्तम ।
ब्राह्मणानां चिकित्सार्थं निर्द्दिष्टो मुनिपुङ्गवैः ॥"
इति पराशरः ॥

"वेदाज्जातो हि वैद्यः स्यादम्बष्ठो ब्रह्मपुत्त्रकः ।"
इति शङ्खः ॥

ब्रह्मा मूर्द्धाभिषिक्तश्च वैद्यः क्षत्त्रविशावपि ।
अमी पञ्च द्विजा एषां यथापूर्व्वञ्च गौरवम् ॥"
इति हारीतः ॥

"मातुर्यदा प्रजायन्ते द्वितीयं मौञ्जिबन्धनात् ।
ब्राह्मणक्षत्त्रियविशस्तस्मादेते द्विजाः स्मृताः ॥"
इति याज्ञवल्क्यवचनम् ॥

मूर्द्धाभिषिक्ताम्बष्ठयोरपि पितृवत्त्वात् द्विजत्वम् ॥
इति वृद्धाः ॥

"आयुर्व्वेदोपनयनाद्वैद्यो द्विज इति स्मृतः ॥"
इति वैद्यकेऽभिवेशः ॥

"तपोयोगात् पुरा वैद्यास्तेजसा पितृवत् स्मृताः ।
विप्रात् चत्त्राद्यतो न्यूनाः क्रियया वैश्यवत्
कृताः ॥
शनैः शनैः क्रियालोपादथ ता वैद्यजातयः ।
कलौ शूद्रत्वमापन्ना यथा क्षत्त्रा यथा विशः ॥"
इति विष्णुः ॥

"युगे जघन्ये द्वे जाती ब्राह्मणः शूद्र एव च ।"
इति यमः ॥

"शनकैश्च क्रियालोपादिमाः क्षत्त्रियजातयः ।
वृषलत्वङ्गता लोके ब्राह्मणादर्शनेन च ॥"
इति मनुवचनं धृत्वा एवमम्बष्ठादीनामपि कलौ
शूद्रत्वमिति स्वस्वग्रन्थेषु वाचस्पतिमिश्रादिभि-
स्तथा शुद्धितत्त्वे स्मार्त्तभट्टाचार्य्येणाप्युक्तम् ।
अतएव कुलपञ्जिकायामुक्तम् । अतिदिष्टं हि
वैद्यस्य शूद्रत्वं क्षत्त्रियादिवदिति । तस्मात्
चत्त्रविशोस्तुल्यो वैद्यः शूद्रस्य पूजित इति ॥ * ॥

"युगे युगे कर्म्मणैवोत्कर्षापकर्षावाह मनुः ।
तपोरीतिप्रभावैश्च ते गच्छन्ति युगे युगे ॥"
मनुष्येष्विह जन्मत इति ॥

"अम्बष्ठेष्वम्बताचार्य्यः ख्यातोऽभूद्भुवनत्रये ।
सिद्धविद्याह्वयां कन्यां स्ववैद्यस्य तु मानसीम् ॥
उपयेमे महौजा यश्चिकित्सतकथा श्रुतः ।
अथैतस्य वरेणैव ख्याता वैद्या महौजसः ॥
सेनो दासश्च गुप्तश्च दत्तो देवः करो धरः ।
राजः सोमश्च नन्दिश्च कुण्डश्चन्द्रश्च रक्षितः ॥
सन्ताना बहवश्चैषां बभूवुश्च चिकित्सकाः ।
कुलानुरूपतश्चैषां जाताः पद्धतयोऽप्यमूः ॥
तेषां प्रशंसा निन्दा च बभूव स्वेन कर्म्मणा ।
उत्तमौ सेनदासौ च गुप्तदत्तौ तथैव च ॥
देवः करश्च मध्यस्थौ राजसोमौ कुलाधमौ ।
नन्दिप्रभृतयो निन्द्या शुभपद्धतयोऽपि च ॥
केचिज्जात्या परिख्यातास्तथा वृत्तानुसारतः ।
सर्व्वासामेव जातीनां वृत्तिरेव गरीयसी ।
वृत्तिः स्वर्म्यां च पथ्या च वृत्त्या जातिः प्रव-
र्त्तते ॥"

इति प्राचीनकुलपञ्जिकाधृतव्यासवचनानि ॥
इति वैद्योत्पत्तिकथनम् ॥ * ॥ अथ वैद्यानां
गोत्राणि ।

"अष्टाविंशद्दमी गोत्राः सर्व्वेषां भिषजामपि ।
प्रत्येकन्ते विलिख्यन्ते सेनदासादितः क्रमात् ॥
धन्वन्तरिश्च शक्तिश्च तथा वैश्वानरात्मकौ ।
मौद्गल्यकौशिकौ कृष्णात्रेय आङ्गिरसोऽपि च ॥
अष्टौ गोत्राणि सेनानां दासानां तदनन्तरम् ।
मौद्गल्योऽथ भरद्वाजः शालङ्कायन एव च ॥
शाण्डिल्यश्च वशिष्ठश्च वात्स्यश्च षड़मी मताः ।
गुप्तानां त्रीणि गोत्राणि काश्यपो गौतमस्तथा ॥
सावर्णिरपि दत्तानां चत्वारः परिकीर्त्तिताः ।
कौशिकः काश्यपश्चैव शाण्डिल्यश्चापि तत्परः ॥
मौद्गल्य इति विज्ञेयाश्चत्वारो देवसम्भवाः ।
आत्रेयकृष्णात्रेयौ च शाण्डिल्य आलमायनः ॥
धरस्य काश्यपः प्रोक्तो भरद्वाजश्च कुण्डजः ।
काश्यपो रक्षितस्यैको गोत्रा एते प्रकीर्त्तिताः ॥
दत्तानामाद्यगोत्राणां देशभेदेऽस्ति सन्ततिः ।
एवमात्रेयगोत्रोऽपि दत्तो देशान्तरे श्रुतः ॥
दत्ताः कृष्णात्रेयगोत्रा दृश्यन्ते बहवस्तथा ।
तस्माद्दत्तस्य गोत्राणि सप्त ज्ञेयानि पण्डितैः ॥
कराणां काश्यपो गोत्रो वात्स्यमौद्गल्यकावपि ।
देशभेदे हि विद्यन्ते तत्कराः सप्तगोत्रकाः ॥